# NamaH Katyayanaya

# નમઃ કાત્યાયનાય

## Document Information

Text title : NamaH Katyayanaya

File name : namaHkAtyAyanAya.itx

Category : misc, sahitya, article, pradIptakumArananda

Location : doc_z_misc_general

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : May 13, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 14, 2021

*sanskritdocuments.org*

# નમઃ કાત્યાયનાય

લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

નમોનમોઽસ્તુ શબ્દાય વાર્તિકાઽમલમૂર્તયે ।
શ્રુતધરાય શાન્તાય કાત્યાયનાય યોગિને ॥

સંસ્કૃતવ્યાકરણ-વાઙ્મયે કાત્યાયનઃ વાર્તિકકારરૂપેણ પરિચયઃ પ્રાપ્તઃ । અસૌ મહાત્મા મહાન્ વૈયાકરણ આસીત્ । અસ્ય "વરરુચિઃ" ઇતિ નામાન્તર આસીત્ । મહારાજ-સમુદ્રગુપ્તઃ કૃષ્ણચરિત્ર- કાવ્યે મુનિકવિ-વર્ણનપ્રસંગે અભાણિ-

"યઃ સ્વર્ગારોહણં કૃત્વા સ્વર્ગમાનીતવાન્ ભુવિ ।
કાવ્યેન રુચિરેણૈવ ખ્યાતો વરરુચિઃ કવિઃ ॥

ન કેવલં વ્યાકરણં પુપોષ દાક્ષીસુતસ્યેરિતવાર્તિકૈર્યઃ ।
કાવ્યેઽપિ ભૂયોઽનુ ચકાર તં વૈ કાત્યાયનોઽસૌ કવિકર્મદક્ષઃ ॥ "

ઇતિ સ્વર્ગારોહણકાવ્યકર્તુરસ્ય વાર્તિકકારસ્ય વરરુચેશ્ચ નાનાશ્લોકાઃ વૈદ્યકીયે શાર્ઙ્ગધરપદ્ધત્યાં, સદુક્તિકર્ણામૃતે એવં સુભાષિતમુક્તાવલ્યાદિગ્રન્થેષુ સમુપલભ્યન્તે । ક્વાસૌ કાત્યાયન ઇત્યસ્મિન્ વિષયે જિગમિષા જાયતે । કાત્યાયનશબ્દો વસ્તુતો ગોત્રપ્રત્યયાન્તઃ સિધ્યતિ । સ્કન્દપુરાણે એકો યાજ્ઞવલ્ક્ય-પુત્રઃ કાત્યાયન આસીત્ । તત્પુત્રો વરરુચિઃ । સશ્ચ વિશ્વામિત્રવંશજો યજ્ઞવિદ્યાયાઃ વિલક્ષણસ્તથા શ્રૌત-ગૃહ્ય-શુલ્યસૂત્રાદીનાં સૂત્રગ્રન્થાનાં પ્રણેતા આસીત્ । સોઽપિ શુક્લ-યજુર્વેદસ્ય આંગિરસાયનસ્ય વા કાત્યાયનશાખાયાઃ પ્રવર્તકઃ યાજ્ઞવલ્ક્યસ્ય પૌત્રત્વેન નિરૂપિતઃ, યસ્ય સમયઃ ખ્રી૦પૂ૦ચતુર્થશતાબ્દી તૃતીયશતાબ્દી વા મન્યતે । મહાભાષ્યે- "પ્રિયતદ્ધિતા દાક્ષિણાત્યાઃ" (૧/૧/૩) અનેન વાક્યેન સઃ દાક્ષિણાત્ય-પ્રદેશીય ઇતિ વક્તું શક્યતે । અન્યત્ર એકો ગોભિલપુત્રઃ કાત્યાયનો યઃ છાન્દોગ્યપરિશિષ્ટસ્ય કર્તા એવ । અપરઃ પ્રાકૃતપ્રકાશકારઃ વરરુચિર્યો વાસવદત્તાયાઃ રચનાકારઃ સુબન્ધો માતુલઃ ષષ્ઠશતાબ્દીય આસીત્ । અન્યેષુ કાત્યાયનેષુ એકઃ કૌશિકગોત્રિયઃ, અપરઃ આંગિરસગોત્રિયઃ, અન્યશ્ચ ભાર્ગવગોત્રિયઃ, શ્રુતાઃ । કિન્તુ વાર્તિકકારઃ કાત્યાયનઃ કાત્યગોત્રિય કત્ય-ઋષે અપત્યઃ ખ્રી૦પૂ૦ પઞ્ચમશતાબ્દીય ઇતિ કેચન દ્રઢયન્તિ । અન્યત્ર દૃશ્યતે મહર્ષેઃ કાત્યાયનસ્ય કઠોર-તપસા સન્તુષ્ટા સતી સ્વયમાદિમાતા ભગવતી તદ્વંશે કન્યારૂપેણ સમુત્પન્ના બભૂવ । કાલાન્તરે સા મહિષાસુરસ્ય વિનાશં કૃતવતી । પુનઃ અન્ય- મતાનુસારં કાત્યાયનઃ દાક્ષિણાત્ય-નિવાસી તથા પાણિનેઃ સાક્ષાત્ શિષ્ય આસીદિતિ । એતદ્વિષયે મહતી શંકા વર્તતે । કથાસરિતસાગરે સોમદેવભટ્ટ-મતાનુસારં કાત્યાયનઃ કૌશામ્બેઃ નિવાસી અભૂત્ । તસ્ય પિતા સોમદત્તઃ માતા ચ વસુદત્તા આસ્તામ્ । પૂર્વજન્મનિ સઃ પુષ્પદન્તનામા ગન્ધર્વ બભૂવ । માહેશ્વરીશાપાત્

મર્ત્યભૂમૌ માનવરૂપેણ વરરુચિનામ્ના જાતઃ, યઃ ખલુ વર્ષસ્ય શિષ્ય આસીત્ । પાણિનિરપિ વરરુચેઃ ગુરુભ્રાતા એવ । યચ્ચોક્તં-

"પ્રણિધાનાદથ જ્ઞાત્વા જગાદૈવમુમાપતિઃ ।
યોગી ભૂત્વા પ્રવિશ્યેદં પુષ્પદન્તસ્તદાશ઼ૃણોત્ ॥

જયાયૈ વર્ણિતં તેન કોઽન્યો જાનાતિ હિ પ્રિયે ।
શ્રુત્વેત્યાનાયયદ્દેવી પુષ્પદન્તમતિક્રુધા ॥

મર્ત્યો ભવાવિનીતેતિ વિહ્વલં તં શશાપ સા" —।

ઇતિ નન્દિ-વિરોધસત્વેઽપિ શિવ-પાર્વતીસમ્બાદં ગુપ્તભાવેન યોગબલેન પુષ્પદન્તઃ શ્રુતવાન્ । એતસ્માત્કારણાત્ પાર્વતી શાપિતા તસ્મૈ । સ્કન્દ-પુરાણાનુસારં પુરા યાજ્ઞવલ્ક્યસ્યાશ્રમઃ આનર્તે-ગુજુરાતે આસીત્ । પશ્ચાત્તસ્મિન્ મિથિલાયાં ગતે તત્પુત્રઃ કાત્યાયનઃ મહારાષ્ટ્રં પ્રતિ પ્રસ્થિતઃ । યદિ વાર્તિકકારઃ કાત્યાયનસ્ય પૌત્રોઽભૂત્તર્હિ પાણિનોત્તરવર્ત્તી જ્ઞાયતે, યદિ પાણિનેઃ સાક્ષાત્ શિષ્યસ્તર્હિ તસ્ય સમકાલીન એવ જ્ઞાયતે, ઇતિ મહાન્ વિવાદસ્ય વિષયઃ । વસ્તુસ્થિતિદર્શનેન કાત્યાયનઃ પાણિનેઃ પૂર્વવર્ત્તીતિ નિશ્ચેતું શક્યતે । સંપ્રતિ વરરુચિપ્રણીત-વાર્ત્તિકવિષયે સંક્ષેપત આલોચ્યતેઽત્ર । તત્ર

વાર્ત્તિકં નામ વૃત્તિર્ગ્રન્થસૂત્રવિવૃતિઃ । તત્તુ સ્વતન્ત્રતયા નોપલભ્યતે । વાર્ત્તિકસ્વરૂપં તુ-

"ઉક્તાનુક્તદુરુક્તાનાં ચિન્તા યત્ર પ્રવર્તતે ।
તં ગ્રન્થં વાર્ત્તિકં પ્રાહુઃ વાર્ત્તિકજ્ઞાઃ મનીષિણઃ" ॥

વૃત્તિઃ+કથાદિભ્યઃ ઠક્ । ઉક્તાનુક્તદુરુક્તાર્થવ્યક્તીકારકગ્રન્થો વિશેષો વાર્ત્તિકઃ । યદ્વા યત્ર પ્રાગુક્ત-અનુક્ત-દુરુક્તાદિવિષયાણાં વિચારો વિવક્ષ્યતે તત્ વાર્ત્તિકમિતિ ખ્યાતમ્ । હેમચન્દ્રેણાપિ હેમશબ્દાનુશાસને "ઉક્તાનુક્તદુરુક્તાનાં વ્યતિકારી તુ વાર્ત્તિકમ્" ઉક્તમ્ । રાજશેખરકૃત-કાવ્યમીમાંસાયાં ચ "ઉક્તાનુક્તદુરુક્તચિન્તા વાર્ત્તિકમિ" તિ સમર્થિતમ્ । નાગેશાચાર્યાઃ તત્કૃત-ઉદ્યોતટીકાયાં "ઉક્તાનુક્તદુરુક્તચિન્તાકરત્વં" વાર્ત્તિકત્વમાહુઃ । અનેન સ્પષ્ટં પ્રમાણીક્રિયતે યત્ પાણિનિસૂત્રકૃતત્રિદોષપરિહારાય વરરુચિના ભગવતા વાર્ત્તિકં પ્રણીતમ્ । વાર્ત્તિકાણાં સંખ્યાનિર્દ્ધારણે ન કેનાપિ સમર્થઃ, યતોહિ ભાષ્યકારેણ બહૂનાં વાર્તિકકારાણાં મતાનિ નામાનિ ચ સંગૃહીતાનિ । યદ્ભવતુ કાત્યાયનસ્ય વાર્ત્તિકં પાણિનીયવ્યાકરણસ્ય મહત્વપૂર્ણમંગમ્ । વાર્ત્તિકં વિના પાણિનીય-વ્યાકરણમસંપૂર્ણમેવ । અત્યાધુનિકા વૈયાકરણાઃ વરરુચેઃ પ્રથમ-વાર્ત્તિકં "સિદ્ધેઃ શબ્દાર્થસમ્બધે" પ્રાચીનાઃ "રક્ષોહાગમલધ્વસંન્દેહાઃ પ્રયોજનમ્" વા ગૃહીત્વા ભગવતા પતઞ્જલિના મહાભાષ્યારમ્ભઃ વિહિતઃ ઇતિ સ્વીકુર્વન્તિ । સાયણાચાર્યેણ ઋગ્વેદભાષ્યારમ્ભે વ્યાકરણસ્ય પ્રયોજનસમ્બન્ધે- "તસ્યૈતસ્ય વ્યાકરણસ્ય પ્રયોજનવિશેષો વરરુચિના વાર્ત્તિકે દર્શિતઃ "રક્ષોહાગમલધ્વસંન્દેહાઃ પ્રયોજનમ્" ઉક્તમ્ । "એતાનિ રક્ષાદીનિ પ્રયોજનાનિ પ્રયોજનાન્તરાણિ ચ મહાભાષ્યે પતઞ્જલિના સ્પષ્ટીકૃતાનિ" । ઇતિ ।

કાત્યાયનઃ પ્રકૃતપક્ષે પાણિનો ન દોષદ્રષ્ટા કિન્તુ સમાલોચક એવાસીત્ । પાણિનીયસૂત્રાણામપૂર્ણતામાકલય્ય અત્યાવશ્યકરૂપેણ તેન વાર્ત્તિકાણાં નિર્માણં વિહિતમ્ । કુત્રાપિ પાણિનિં બોદ્ધુમસમર્થઃ સન્ પ્રતિકૂલ-મન્તવ્યો

વિહિતઃ સઃ । પશ્ચાત્  ભાષ્યકારઃ વરરુચિમતં ખણ્ડયિત્વા પાણિનિં સમર્થિતવાન્ । કાત્યાયનવિષયેઽત્ર મયા દિઙ્માત્રં પ્રદર્શિતમ્ । અલમતિ વિસ્તરેણ । શમ્ ।

— લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

Written by Dr. Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

---

*NamaH Katyayanaya*

pdf was typeset on May 14, 2021

Please send corrections to *sanskrit@cheerful.com*